# A-I/1/1315/21

## प्रथमसत्रार्द्धम्

## प्रथमपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. उपदेशातिदेशयोः को भेदः?
2. समिदादिवाक्यानि किम् अभिदधति?
3. वैश्वदेवाख्यं कर्म कुत्र आम्नातम्?

**अथवा**

प्रत्यक्षवचनातिदेशमुदाहरत।

4. चातुर्मास्यगानि पर्वाणि लिखत।
5. रथन्तरशब्दार्थं यथाग्रन्थं प्रदर्शयत।
6. प्रायणीयपदार्थः कः?

**अथवा**

"विश्वजित्सर्वपृष्ठोऽतिरात्रः" वाक्यस्यास्यभिप्रायः कः?

7. 'उपशयो यूपो भवतीति' कः प्रसङ्गः?
8. स्वरसामादिशब्देन धर्मातिदेशं प्रदर्शयत।
9. विशेषातिदेशस्य उपक्रमः कुतः?

**अथवा**

विकल्पे दोषान् प्रदर्शयत।

10. के सान्नाय्यस्य धर्माः?
11. ऐकादशिनाः पशवः के?

**अथवा**

यागो देवताराधनार्थः इत्यत्र पूर्वपक्षी कां युक्तिं दर्शयति?

12. कृष्णलानां ग्रन्थोक्तं लक्षणं लिखत।

13. दैक्षः कस्य विकारः?

**अथवा**

सौर्यचरौ कस्य धर्मा अतिदिश्यन्ते?

14. सत्राहीनयोः स्वरूपं विवृणुत।

15. दर्वीहोमस्य कर्मनामधेय निरूपणे का सङ्गतिः?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. अतिदेशस्वरूपं भेदान् च व्याख्यात।

17. गानविशेष एव रथन्तरादिशब्दार्थः इति निरूपयत।

18. प्रणयनशब्देन सौमिकधर्मा अतिदिश्यन्ते उत नेति विवेचयत।

**अथवा**

कल्पितवचनातिदेशं सोदाहरणं विवृणुत।

19. फलादीनाम् अतिदेशः भवति न वेति विवेचयत।

**अथवा**

अमिक्षायां पयोधर्मातिदेशं साधयत।

20. दर्वीहोमस्य कर्मनामधेयत्वं प्रदर्शयत।

**अथवा**

दर्वीहोमानामपूर्वत्वं विवेचयत।

**स. एकस्य विवरणात्मकमुत्तरं लिखत।** **(1×20=20)**

21. सौर्ये चरौ वैदिकेतिकर्तव्यताविषयं विमृशत।

**अथवा**

आग्नेयधर्मातिदेशं विवेचयत।

**अथवा**

अतिदेशस्वरूपं विवृणुत।

# A-I/2/1316/21

## प्रथमसत्रार्द्धम्

## द्वितीयपत्रम्

## मीमांसा

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे प्रश्ना: समाधेया:।** **(15×2=30)**

1. बाधनिरूपणात् पूर्वं किं निरूपितम्?
2. बाधस्य एकमुदाहरणं लिखत।
3. कृष्णलेषु शेषभक्षणं कर्तव्यं न वा? कुत:?
4. खलेवाली नाम का?
5. सत्रादुदवसाय इत्यत्र उदवसानं नाम किम्?

**अथवा**

सारस्वतसत्रं परिचाययत।

6. त्रिवत्स: साण्ड: सोमक्रयण इति वाक्यस्य कोऽर्थ:?
7. न तौ पशौ करोति इत्यत्र प्रतिषेध: पर्युदासो वा?
8. को नाम स्थाणु:?
9. सर्वस्वारयज्ञं परिचाययत।

**अथवा**

सत्रमध्ये यजमानमरणे किं कार्यम्?

10. सत्रे दक्षिणादानं कार्यं न वा?
11. कृष्णलेष्टिविधिवाक्यं लिखत।

**अथवा**

न सोमे इति निषेधोऽर्थवादो वा? कुत:?

12. प्रतिषेधपर्युदासौ उदाहरत।
13. समूढव्यूढपदार्थौ दर्शयत।

**अथवा**

सुत्या नाम का?

14. अत्र ह्येवावपन्तीति वाक्यस्य कोऽर्थः?

**अथवा**

हिरण्यगर्भमन्त्रः कस्मिन्नाधारे निविशते?

15. ऋतपेये का दक्षिणा? कस्मै देया च?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. खलेवाल्यां खादिरत्वं निवर्तते न वेति विचारयत।

17. यदि जगत्सामा अग्रयणाग्रान् इति वाक्यार्थविचारं प्रस्तुवत।

18. स्तोमविवृद्धौ संख्यासंपत्त्यर्थम् ऋगागमः पवमानस्तोत्रे एव इति विचार्य निर्धारयत।

**अथवा**

त्रिवत्सं साण्डः इत्यत्र साण्डस्य द्रव्यान्तरनिवर्तकत्वं साधयत।

19. विधिगत एव देवताशब्दः त्यागादौ उच्चारणीय इति साधयत।

**अथवा**

अतिरात्रे षोडशिग्रहणस्य विकल्पमुपपादयत।

20. गौश्चाश्वश्चेत्यादि वाक्यं विलिख्य द्वादशशतसंख्यायाः कुत्र निवेश इति विचारयत।

**अथवा**

अग्नीषोमीयादिहिंसाया निषेधाविषयत्वं साधयत।

**स. एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. संख्यामुष्ट्यधिकरणविषयं प्रतिपादयत।

**अथवा**

बाधलक्षणपरिष्कारं प्रतिपादयत।

**अथवा**

त्रिविधं बाधं विस्तरेण सोदाहरणं निरूपयत।

# A-I/3/1317/21

**प्रथमसत्रार्द्धम्**

**तृतीयपत्रम्**

**मीमांसा**

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. सम्प्रदायप्रतिपादितं भाष्यलक्षणम् किम्?
2. अध्याहारपदार्थः कः?
3. समावर्तनविधायकं शास्त्रं लिखत।

**अथवा**

भाष्यरीत्या अग्नेः लक्षणं किम्?

4. कमर्थमभिप्रेत्य श्रेयस्कर इति प्रयुक्तवान् भाष्यकारः?
5. चोदनया कौ द्वौ लक्ष्येते?
6. गौः इत्यत्र शब्दार्थः कः?

**अथवा**

चित्राक्षेपः कः?

7. देहव्यतिरिक्त आत्मा नेति क आहुः?
8. 'अनित्यदर्शनाच्च' सूत्रार्थः कः?
9. प्रावाहणिः, बबरः इत्यादिपदार्थान् लिखत।

**अथवा**

के वनस्पतयः? के च ओषधयः?

10. अर्थवादाधिकरणस्य प्रथमसूत्रं लिखत।
11. शास्त्रदृष्टविरोधः कः?
12. बर्हिषि रजतं कुतो न देयम्?

**अथवा**

विधिवन्निगदाधिकरणे विषयवाक्यार्थः कः?

13. चतुर्मास्यगानि पर्वाणि कानि ?

14. पदार्थप्राबल्यमुदाहरत।

15. नामधेयनिमित्तानि प्रदर्शयत।

**अथवा**

कः वाक्यशेषार्थः ?

**ब. सर्वे प्रश्नाः समाधेयाः।** **(5×6=30)**

16. 'चोदनालक्षणोऽर्थो धर्मः' सूत्रार्थं यथाभाष्यं व्याख्याता।

17. प्रत्यक्षादिप्रमाणानि विवृणुत।

18. शून्यवादं खण्डयत।

**अथवा**

शब्दस्य नित्यत्वं साधयत।

19. अर्थवादानां प्रामाण्यं स्थापयत।

**अथवा**

मन्त्राधिकरणमारचयत।

20. विरोधाधिकरणमारचयत।

**अथवा**

गौणीवृत्तीः व्याख्यात।

**स. एकस्य विवरणात्मकमुत्तरं लिखत।** **(1×20=20)**

21. 'अथाऽतो धर्मजिज्ञासा' सूत्रभाष्यं वर्णयत।

**अथवा**

चोदनायाः प्रामाण्यं स्थापयत।

**अथवा**

स्मृत्याचारयोः प्रामाण्यं समर्थयत।

# A-I/4/1318/21

## प्रथमसत्रार्द्धम्

## चतुर्थपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे प्रश्नाः समाधेयाः।** **(15×2=30)**

1. श्लोकवार्तिकस्य मङ्गलश्लोकं लिखत।
2. अविद्यमानोऽपि दोषः केषां प्रकाशते?
3. बहुविद्यान्तराश्रिता विद्या का?
4. चक्षुःश्रोत्रयोः अप्राप्यकारित्वं कैरुच्यते?
5. योगाचारमते ज्ञानविषयः कः?
6. श्येनादीनां कथमनर्थत्वम्?

**अथवा**

कीदृशी हिंसा अधर्मो न भवति?

7. किं नाम श्रेयः? कथं च तज्जायते?

**अथवा**

अपूर्वस्य धर्मशब्दवाच्यत्वं कुतो न?

8. भवदासेन कः समुदायः कस्मिन्नर्थे कल्पितः?
9. लोक इत्यादिभाष्यस्य प्रशंसार्थकत्वं कथम्?
10. धर्माधर्मशब्दयोः लोकप्रसिद्धार्थः कः?
11. हिंसात्वेन अर्धमत्वसाधने को दोषः?

**अथवा**

परतः प्रामाण्यस्वीकारे को दोषः?

12. धर्माय जिज्ञासेत्यत्र कस्मिन्नर्थे चतुर्थी?

**अथवा**

धर्मस्य जिज्ञासेत्यत्र षष्ठ्यर्थः कः?

13. द्रव्यगुणयोर्धर्मत्वे उदाहरणं दर्शयत।

**अथवा**

लोक इत्यादिभाष्यस्य कति अर्था:?

14. प्रामाण्यविषये सांख्यमतं किम्?

15. दानहिंसयो: विषय: क:?

**ब. सर्वे प्रश्ना: समाधेया:।** **(5×6=30)**

16. विशुद्धज्ञानेत्यादिश्लोकस्य अर्थद्वयं वर्णयत।

17. प्रामाण्यं परत: अप्रामाण्यं स्वत इति बौद्धमतं निरूपयत।

**अथवा**

बुद्धादीनामसार्वज्ञ्यं साधयत।

18. द्रव्यादीनां धर्मत्वं धर्मस्य अनैन्द्रियकत्वं च साधयत।

19. लोक इत्यादिभाष्यस्य प्रत्याख्यानरूपमर्थं वर्णयत।

**अथवा**

लोक इत्यादिभाष्यस्य परिसंख्यार्थं वर्णयत।

20. अथशब्दार्थविचारं प्रस्तुवत।

**अथवा**

अतश्शब्दस्य आवश्यकतामुपादयत।

**स. एकस्य निबन्धात्मकमुत्तरं लिखत।** **(1×20=20)**

21. लोक इत्यादिभाष्यस्य षडर्थान् वर्णयत।

**अथवा**

चोदनैव धर्मे प्रमाणं नान्यादिति विस्तरेण वर्णयत।

**अथवा**

श्येनादेर्धर्मत्वविचारं प्रस्तुवत।